# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – २ | गुणा: - ७० |
|---|---|---|
| विषय: - फलितज्यौतिषम् | (C.C.- 4.1.1. Old & New ) | |
| दिनाङ्क: - १५/१२/२०१८ | बृहत्संहिता । | समय: -२.०० त: ०५.०० |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितयो: कस्यचित् एकस्य व्याख्यां कुरुत । ( ५ )**

*(अ) जयति जगत: प्रसूतिर्विश्वात्मा सहजभूषणं नभस: ।*
*द्रुतकनकसदृशदशशतमयूखमालार्चित: सविता ॥*

*(ब) माघे तुमातृपितृभक्तवशिष्ठगोत्रान् स्वाध्यायधर्मनिरतान् करिणस्तुरङ्गान् ।*
*बङ्गाङ्गंकाशिमनुजांश्च दुनोति राहुर्वृष्टिं च कर्षकजनाभिमतां करोति ॥*

**प्रश्न: २ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखतु । ( १० )**

*(अ) मासफलम् । (ब) दैवज्ञलक्षणम् ।*

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितयो: कस्यचित् एकस्य उपरि व्याख्यां करोतु । ( ५ )**

*(अ) एकादशेपिङ्गलकालयुक्तसिद्धार्थरौद्रा: खलुदुर्मतिश्च ।*
*आद्येतु वृष्टिर्महती सचौराश्चासोहनूकम्पयतुश्चकास: ॥*
*यत्कालं युक्तं तदनेकदोषं सिद्धार्थसञ्ज्ञे बहवो गुणाश्च ।*
*रौद्रोऽति रौद्र: क्षयकृत्प्रदिष्टो, यो दुर्मतिर्मध्यमवृष्टिकृत्स: ॥*

*(ब) भाग्ये युगे दुन्दुभिसञ्ज्ञमाद्यं सस्यस्य वृद्धिं महतीं करोति*
*अङ्गारसञ्ज्ञं तदनुक्षयायनरेश्वराणां विषमाच वृष्टि: ।*
*रक्ताक्षमब्दं कथितं तृतीयं यस्मिन् भयं दंष्ट्रिकृतं गदाश्च*
*क्रोधं बहुक्रोधकरं चतुर्थं राष्ट्राणि शून्यी कुरुते विरोधै: ॥*

**प्रश्न: ४ अधोलिखितयो: कस्यचित् एकस्य उपरि विवर्णनं करोतु । ( १० )**

*(अ) संवत्सरपुरषाङ्गविभागत: नक्षत्रफलञ्च । (ब) केतुचाराध्याय: ।*

**तृतीयान्विति:**

**प्रश्न: ५ अधोलिखितयो: कस्यचित् एकस्य उपरि व्याख्यां करोतु । ( ५ )**

*(अ ) रविरविसुतभोगमागतं क्षितिसुतभेदनवक्रदूषितम् ।*
*ग्रहणगतमथोल्कया हतं नियतमुषाकरपीडितं च यत् ॥*
*तदुपहतमिति प्रचक्षते प्रकृतिविपर्ययातमेव वा ।*
*निगदितपरिबर्गदूषणं कथितविपर्ययगं समृद्धये ॥*

(ब) *भानां यथासम्भवमुत्तरेण यातो ग्रहाणां यदिवाशशाङ्कः।*
*प्रदक्षिणं तच्छुभकृन्नृपाणां याम्येन यातो न शिवः शशाङ्कः॥*

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **(१०)**

*(अ) नक्षत्रव्यूहाध्यायस्य सारांशः।* *(ब) भौमस्य वर्षफलम्।*

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितेभ्यः कस्यचित् एकस्य व्याख्यां करोतु ।** **(५)**

(अ) *ऐशानो यदि शीतलोऽमरगणैः संसेव्यमानो भवेत्।*
*पुन्नागगरूपारिजातसुरभिर्वायुः प्रचण्डध्वनिः॥*
*आपूर्णोदकयौवना वसुमती सम्पन्नसस्याकुला*
*धर्मिष्ठाः प्रणतारयो नृपतयो रक्षन्ति वर्णस्तदा॥*

(ब) *पवनसलिलविद्युद्गर्जिताऽभ्रान्वितो यः स भवति बहुतोयः पञ्चरूपाभ्युपेतः।*
*विसृजति यदि तोयं गर्भकालेऽतिभूरि प्रसवसमयमित्वा शीकराम्भः करोति॥*

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **(१०)**

*(अ) गर्भलक्षणाध्यायः। (ब) ऋतुवशगर्भलक्षणम्।*

## पञ्चमान्वितिः

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु।** **(१०)**

(१) *बृहत्संहिताग्रन्थस्य लेखकः कः?*

(२) *बृहत्संहिताग्रन्थस्य प्रथमोऽध्यायस्य नाम किम्?*

(३) *प्रथममुनिः कः?*

(४) *ज्यौतिषशास्त्रे कति स्कन्धाः भवन्ति?*

(५) *यस्मिन् गणितद्वारा ग्रहगतेः निर्णयं क्रियते सा पद्धतिः का?*

(६) *आकाशे रुधिरसमानरक्तवर्णीयसूर्यमण्डलः किं फलं ददाति?*

(७) *यदि सूर्यमण्डलस्य उत्तरदिशायां प्रति सूर्यः दृश्यते तदा फलं किम्?*

(८) *सव्य शब्दस्य अर्थः कः?*

(९) *यदि वैशाखमासस्य अमायां सूर्यग्रहणेवं पूर्णिमायां चन्द्रग्रहणं भवति तदा फलं किम्?*

(१०) *पूर्वदिशायां गौरपद्मकेतोदये फलं किम्?*

(११) *यदि अगस्त्यः रुक्षः तदा फलं किम्?*

(१२) *सूर्यस्य कस्मिन् अंशे अगस्त्यदर्शनं भवति?*

(१३) *रोहिणीगतसूर्यः भवति तदा अगस्त्यऋषिः अस्तं प्राप्नोति न वा?*

(१४) *तुरगारोहा, शब्दस्य अर्थः कः?*

(१५) *स्वातित्युत्तराषाढारोहिणीनक्षत्रगतचन्द्रस्य सह यदिपापग्रहाः भौम-शनि-राहु-केतुग्रहाणां योगाः भवन्ति तदा शुभाशुभं वा?*

--००--